ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः

॥ ह॒रि॒ः ओं ॥

# कृष्ण यजुर्वेदीय तैत्तिरीय संहिता

# पद पाठः (वाक्य सहित)

# प्रथमकाण्डे पञ्चमः प्रश्नः

Version 1.1 August 31, 2022

## Version Notes:

**This is now the current Version 1.1 dated August 31, 2022.**

1. This replaces the earlier version 1.0 dated Oct 31, 2021.

2. Corrections found and reported till August 15, 2022 are updated.

3. In this version we have newly added a summery of various padams at the end part of this book.

4. Required convention, style and presentation improvements or standardisations has been done whereever applicable.

5. Notify your corrections / suggestions etc to our email id vedavms@gmail.com

## Previous Versions

| | | |
|---|---|---|
| 1st | Version Number | 0.0 dated 30th April 2019 |
| 2nd | Version Number | 0.1 dated 31st March 2020 |
| 3rd | Version Number | 0.2 dated 30th June 2020 |
| 4th | Version Number | 0.3 dated 31st Aug 2020 |
| 5th | Version Number | 1.0 dated 30th June 2021 |
| 6th | Version Number | 1.0 dated 31st Oct 2021 |

Table of Contents

1 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे प्रथमंकाण्डं ........ 5

1.5 प्रथमकाण्डेपञ्चमः प्रश्नः – पुनराधानं ........ 5

ओं नमः परमात्मने, श्री महागणपतये नमः,

श्री गुरुभ्यो नमः ॥ हरिः ओं

# 1 कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे प्रथमंकाण्डं

## 1.5 प्रथमकाण्डेपञ्चमः प्रश्नः – पुनराधानं

**TS 1.5.1.1**

देवासुराः सँयत्ता आसन् ते देवा विजयमुपयन्तो ऽग्नौ वामं वँसु सं न्यदधतेदमु नो भविष्यति यदि नो जेष्यन्तीति तदग्निर्न्यकामयत तेनापाक्रामत् तद्–देवा विजित्यावरुरुथ्समाना अन्वायन् तदस्य सहसाऽऽ *दित्थ्सन्त सो ऽरोदीद्–यदरोदीत् तद् रुद्रस्य रुद्रत्वं यँदश्र्वशीयत तद् – [ ] **1**

**TS 1.5.1.1 (Padam)**

देवासुरा इति देव – असुराः । सँयत्ता इति सं – यत्ताः । आसन्न् । ते । देवाः । विजयमिति वि – जयम् । उपयन्त इत्युप – यन्तः । अग्नौ । वामम् । वसु । सम् । नीति । अदधत । इदम् । उ । नः ।

भविष्यति । यदि । नः । जेष्यन्ति । इति । तत् । अग्निः । नीति ।
अकामयत । तेन । अपेति । अक्रामत् । तत् । देवाः ।
विजित्येति वि – जित्य । अवरुरुथ्समाना इत्यव – रुरुथ्समानाः ।
अन्विति । आयन्न् । तत् । अस्य । सहसा । एति । अदिथ्सन्त ।
सः । अरोदीत् । यत् । अरोदीत् । तत् । रुद्रस्य । रुद्रत्वमिति
रुद्र – त्वम् । यत् । अश्रु । अशीयत । तत् । **1 (50)**

**TS 1.5.1.2**

रजत॰ हिरण्यमभवत् तस्माद् रजत॰ हिरण्य–मदक्षिण्य–मश्रुज॰
हि यो बर्.हिषि ददाति पुरा ऽस्य सँवथ्सराद् गृहे रुदन्ति तस्माद्–
बर्.हिषि न देय॰ सो ऽग्निरब्रवीद् भाग्यसान्यथ व इदमिति
पुनराधेयं ते केवलमित्यब्रुवन्–नृद्ध्नवत् खलु स इत्यब्रवीद्–यो
मद्देवत्य–मग्नि–मादधाता इति तं पूषा ऽऽ *धत्त तेन – [ ] **2**

**TS 1.5.1.2 (Padam)**

रजतम् । हिरण्यम् । अभवत् । तस्मात् । रजतम् । हिरण्यम् ।
अदक्षिण्यम् । अश्रुजमित्यश्रु – जम् । हि । यः । बर्.हिषि ।
ददाति । पुरा । अस्य । सँवथ्सरादिति सं – वथ्सरात् ।

गृहे । रुदन्ति । तस्मात् । बर्.हिषि । न । देयम् । सः । अग्निः ।

अब्रवीत् । भागी । असानि । अथ । वः । इदम् । इति ।

पुनराधेयमिति पुनः – आधेयम् । ते । केवलम् । इति । अब्रुवन्न् ।

ऋद्ध्नवत् । खलु । सः । इति । अब्रवीत् । यः । मद्देवत्यमिति

मत् – देवत्यम् । अग्निम् । आदधाता इत्या – दधातै । इति । तम् ।

पूषा । एति । अधत्त । तेन । **2 (50)**

**<u>TS 1.5.1.3</u>**

पूषा ऽऽर्द्ध्नोत् तस्मात् पौष्णाः पशव उच्यन्ते तं त्वष्टाऽऽ *धत्त तेन

त्वष्टा ऽऽर्द्ध्नोत् तस्मात् त्वाष्ट्राः पशव उच्यन्ते तं मनुरा ऽधत्त तेन

मनुरार्द्ध्नोत् तस्मान्मानव्यः प्रजा उच्यन्ते तं धाताऽऽ *धत्त तेन

धाता ऽऽर्द्ध्नोथ् सँँवथ्सरो वै धाता तस्माथ् सँँवथ्सरं प्रजाः

पशवो ऽनु प्र जायन्ते य एवं पुनराधेयस्य**र्द्धिं** ँँवेद – [ ] **3**

**<u>TS 1.5.1.3 (Padam)</u>**

पूषा । आर्द्ध्नोत् । तस्मात् । पौष्णाः । पशवः । उच्यन्ते । तम् ।

त्वष्टा । एति । अधत्त । तेन । त्वष्टा । आर्द्ध्नोत् । तस्मात् । त्वाष्ट्राः ।

पशवः । उच्यन्ते । तम् । मनुः । एति । अधत्त । तेन । मनुः ।

आर्द्ध्नोत् । तस्मात् । मानव्यः । प्रजा इति प्र – जाः । उच्यन्ते ।
तम् । धाता । एति । अधत्त । तेन । धाता । आर्द्ध्नोत् । सँवथ्सर इति
सं – वथ्सरः । वै । धाता । तस्मात् । सँवथ्सरमिति सं–वथ्सरम् ।
प्रजा इति प्र–जाः । पशवः । अनु । प्रेति । जायन्ते ।
यः । एवम् । पुनराधेयस्येति पुनः – आधेयस्य । ऋद्धिम् ।
वेद । **3 (50)**

**TS 1.5.1.4**

ध्र्नोत्येव यो ऽस्यैवं बन्धुतां वेद बन्धुमान् भवति भागधेयं वा
अग्निराहित इच्छमानः प्रजां पशून्. यजमानस्योप दोद्रावोद्वास्य पुनरा
दधीत भागधेयेनैवैन(ं) समर्द्धयत्यथो शान्तिरेवास्यैषा
पुनर्वस्वोरादधीतैतद्–वै पुनराधेयस्य नक्षत्रं यत् पुनर्वसू स्वायामेवैनं
देवतायामाधाय ब्रह्मवर्चसी भवति दर्भै–( )–रा दधात्ययातयामत्वाय
दर्भैरा दधात्यद्भ्य एवैनमोषधीभ्यो ऽवरुद्ध्याऽऽ धत्ते पञ्चकपालः
पुरोडाशो भवति पञ्च वा ऋतव ऋतुभ्य एवैनमवरुद्ध्याऽऽ धत्ते ॥ **4**

**TS 1.5.1.4 (Padam)**

ऋद्ध्नोति । एव । यः । अस्य । एवम् । बन्धुताम् । वेद । बन्धुमानिति
बन्धु – मान् । भवति । भागधेयमिति भाग –धेयम् । वै । अग्निः ।
आहित इत्या – हितः । इच्छमानः । प्रजामिति प्र–जाम् । पशून् ।
यजमानस्य । उपेति । दोद्राव । उद्वास्येत्युत् – वास्य । पुनः । एति ।
दधीत । भागधेयेनेति भाग – धेयेन । एव । एनम् । समिति ।
अर्धयति । अथो इति । शान्तिः । एव । अस्य । एषा । पुनर्वस्वोरिति
पुनः – वस्वोः । एति । दधीत । एतत् । वै । पुनराधेयस्येति
पुनः – आधेयस्य । नक्षत्रम् । यत् । पुनर्वसू इति पुनः – वसू ।
स्वायाम् । एव । एनम् । देवतायाम् । आधायेत्या – धाय ।
ब्रह्मवर्चसीति ब्रह्म – वर्चसी । भवति । दर्भैः ( ) । एति । दधाति ।
अयातयामत्वायेत्ययातयाम – त्वाय । दर्भैः । एति । दधाति ।
अद्भ्य इत्यत् – भ्यः । एव । एनम् । ओषधीभ्य इत्योषधि–भ्यः ।
अवरुद्ध्येत्यव – रुद्ध्य । एति । धत्ते । पञ्चकपाल इति
पञ्च – कपालः । पुरोडाशः । भवति । पञ्च । वै । ऋतवः ।

ऋतुभ्य इत्यृतु – भ्यः । एव । एनम् । अवरुद्ध्येत्यव – रुद्ध्य ।
एति । धत्ते ॥ **4 (75)**

**(अशीयत तत्– तेन–वेद– दर्भैः पञ्चविꣳशतिश्च)** *(A1)*

**TS 1.5.2.1**

परा वा एष यज्ञं पशून्. वपति यो ऽग्निमुद्वासयते पञ्चकपालः
पुरोडाशो भवति पाङ्क्तो यज्ञः पाङ्क्ताः पशवो यज्ञमेव पशूनव
रुन्धे वीरहा वा एष देवानाꣳ यो ऽग्निमुद्वासयते न वा एतस्य ब्राह्मणा
ऋतायवः पुरा ऽन्नमक्षन् पङ्क्त्यो याज्यानुवाक्या भवन्ति पाङ्क्तो
यज्ञः पाङ्क्तः पुरुषो देवानेव वीरं निरवदायाग्निं पुनरा – [ ] **5**

**TS 1.5.2.1 (Padam)**

परेति । वै । एषः । यज्ञम् । पशून् । वपति । यः । अग्निम् ।
उद्वासयत इत्युत् – वासयते । पञ्चकपाल इति पञ्च – कपालः ।
पुरोडाशः । भवति । पाङ्क्तः । यज्ञः । पाङ्क्ताः । पशवः । यज्ञम् ।
एव । पशून् । अवेति । रुन्धे । वीरहेति वीर – हा । वै । एषः ।
देवानाम् । यः । अग्निम् । उद्वासयत इत्युत् – वासयते । न । वै ।
एतस्य । ब्राह्मणाः । ऋतायव इत्यृत–यवः । पुरा । अन्नम् । अक्षन् ।

पङ्क्त्यः । याज्यानुवाक्या इति याज्या – अनुवाक्याः । भवन्ति ।
पाङ्क्तः । यज्ञः । पाङ्क्तः । पुरुषः । देवान् । एव । वीरम् ।
निरवदायेति निः – अवदाय । अग्निम् । पुनः । एति । **5 (50)**

**TS 1.5.2.2**

धत्ते शताक्षरा भवन्ति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठति यद्–वा अग्निराहितो नर्द्ध्यते ज्यायो भागधेयं निकामयमानो यदाग्नेयꣳ सर्वं भवति सैवास्यर्द्धिः सं ँवा एतस्य गृहे वाक्सृज्यते यो ऽग्निमुद्वासयते स वाचꣳ सꣳसृष्टां ँयजमान ईश्वरो ऽनु पराभवितो र्विभक्तयो भवन्ति वाचो विधृत्यै यजमानस्या–पराभावाय – [ ] **6**

**TS 1.5.2.2 (Padam)**

धत्ते । शताक्षरा इति शत – अक्षराः । भवन्ति । शतायुरिति शत – आयुः । पुरुषः । शतेन्द्रिय इति शत – इन्द्रियः । आयुषि । एव । इन्द्रिये । प्रतीति । तिष्ठति । यत् । वै । अग्निः ।
आहित इत्या – हितः । न । ऋद्ध्यते । ज्यायः । भागधेयमिति भाग – धेयम् । निकामयमान इति नि – कामयमानः । यत् ।

आग्नेयम् । सर्वम् । भवति । सा । एव । अस्य । ऋद्धिः । समिति । वै । एतस्य । गृहे । वाक् । सृज्यते । यः । अग्निम् । उद्वासयत इत्युत् – वासयते । सः । वाचम् । स॒ꣳसृष्टामिति सं – सृष्टाम् । यजमानः । ईश्वरः । अन्विति । पराभवितोरिति परा – भवितोः । विभक्तय इति वि – भक्तयः । भवन्ति । वाचः । विधृत्या इति वि – धृत्यै । यजमानस्य । अपराभावायेत्यपरा – भावाय । **6 (50)**

**<u>TS 1.5.2.3</u>**

विभक्तिं करोति ब्रह्मैव तदकरुपा॒ꣳशु यजति यथा वामं ँवसु विविदानो गूहति तादृगेव तदग्निं प्रति स्विष्टकृतं निराह यथा वामं ँवसु विविदानः प्रकाशं जिगमिषति तादृगेव तद्–विभक्तिमुक्त्वा प्रयाजेन वषट्करोत्यायतनादेव नैति यजमानो वै पुरोडाशः पशव एते आहुती यदभितः पुरोडाशमेते आहुती – [ ] **7**

**<u>TS 1.5.2.3 (Padam)</u>**

विभक्तिमिति वि – भक्तिम् । करोति । ब्रह्म । एव । तत् । अकः । उपा॒ꣳश्वित्युप–अ॒ꣳशु । यजति । यथा । वामम् । वसु । विविदानः ।

गृहति । तादृक् । एव । तत् । अग्निम् । प्रतीति । स्विष्टकृतमिति

स्विष्ट– कृतम् । निरिति । आह । यथा । वामम् । वसु । विविदानः ।

प्रकाशमिति प्र – काशम् । जिगमिषति । तादृक् । एव । तत् ।

विभक्तिमिति वि – भक्तिम् । उक्त्वा । प्रयाजेनेति प्र – याजेन ।

वषट् । करोति । आयतनादित्या – यतनात् । एव । न । एति ।

यजमानः । वै । पुरोडाशः । पशवः । एते इति ।

आहुती इत्या – हुती । यत् । अभितः । पुरोडाशम् । एते इति ।

आहुती इत्या – हुती । **7 (50)**

**TS 1.5.2.4**

जुहोति यजमानमेवोभयतः पशुभिः परि गृह्णातिकृतयजुः

संभृतसंभार इत्याहुर्न संभृत्याः संभारा न यजुः कर्तव्यमित्यथो खलु

संभृत्या एव संभाराः कर्तव्यं ँयजु र्यज्ञस्य समृद्ध्यै पुनर्निष्कृतो

रथो दक्षिणा पुनरुथ्स्यूतं ँवासः पुनरुथ्सृष्टो ऽनड्वान् पुनराधेयस्य

समृद्ध्यै सप्त ते अग्ने समिधः सप्त जिह्वा इत्यग्निहोत्रं

जुहोति यत्रयत्रैवास्य न्यक्तं तत – [ ] **8**

**TS 1.5.2.4 (Padam)**

जुहोति । यजमानम् । एव । उभयतः । पशुभिरिति पशु – भिः ।

परीति । गृह्णाति । कृतयजुरिति कृत – यजुः । संभृतसंभार इति

संभृत – संभारः । इति । आहुः । न । संभृत्या इति सं – भृत्याः ।

संभारा इति सं–भाराः । न । यजुः । कर्तव्यम् । इति । अथो इति ।

खलु । संभृत्या इति सं – भृत्याः । एव । संभारा इति सं–भाराः ।

कर्तव्यम् । यजुः । यज्ञस्य । समृद्ध्या इति सं – ऋद्ध्यै ।

पुनर्निष्कृत इति पुनः – निष्कृतः । रथः । दक्षिणा ।

पुनरुथ्स्यूतमिति पुनः – उथ्स्यूतम् । वासः । पुनरुथ्सृष्ट इति

पुनः – उथ्सृष्टः । अनड्वान् । पुनराधेयस्येति पुनः – आधेयस्य ।

समृद्ध्या इति सं – ऋद्ध्यै । सप्त । ते । अग्ने । समिध इति

सं – इधः । सप्त । जिह्वाः । इति । अग्निहोत्रमित्यग्नि – होत्रम् ।

जुहोति । यत्रयत्रेति यत्र–यत्र । एव । अस्य ।

न्यक्तमिति नि – अक्तम् । ततः । **8 (50)**

**TS 1.5.2.5**

एवैनमव रुन्धे वीरहा वा एष देवानां ँयो ऽग्निमुद्वासयते तस्य वरुण

एवर्णयादाग्निवारुण-मेकादशकपालमनु निर्वपेद्-यं चैव हन्ति

यश्चास्यर्णयात् तौ भागधेयेन प्रीणाति नाऽऽर्तिमार्च्छति यजमानः ॥ **9**

**TS 1.5.2.5 (Padam)**

एव । एनम् । अवेति । रुन्धे । वीरहेति वीर – हा । वै । एषः ।

देवानाम् । यः । अग्निम् । उद्वासयत इत्युत् – वासयते । तस्य ।

वरुणः । एव । ऋणयादित्यृण – यात् ।

आग्निवारुणमित्याग्नि – वारुणम् ।

एकादशकपालमित्येकादश – कपालम् । अनु । निरिति । वपेत् ।

यम् । च । एव । हन्ति । यः । च । अस्य । ऋणयादित्यृण – यात् ।

तौ । भागधेयेनेति भाग – धेयेन । प्रीणाति । न । आर्तिम् । एति ।

ऋच्छति । यजमानः ॥ **9 (36)**

**(आ-ऽपराभावाय-पुरोडाशमेते-आहुती-ततः-षट्त्रिꣳशच्च)** *(A2)*

**TS 1.5.3.1**

भूमि र्भूम्ना द्यौ र्वरिणा ऽन्तरिक्षं महित्वा ।

उपस्थे ते देव्यदिते ऽग्निमन्नादमन्नाद्यायाऽऽ दधे ॥

आ ऽयं गौः पृश्ञिरक्रमीदसनन् मातरं पुनः ।

पितरं च प्रयन्थ्सुवः ॥

त्रि॒ꣳशद्–धाम वि राजति वाक् पतङ्गाय शिश्रिये ।

प्रत्यस्य वह द्युभिः ॥ अस्य प्राणादपानत्यन्तश्चरति रोचना ।

व्यख्यन् महिषः सुवः ॥

यत्त्वा–[ ] **10**

**TS 1.5.3.1 (Padam)**

भूमिः । भूम्ना । द्यौः । वरिणा । अन्तरिक्षम् । महित्वेति महि–त्वा ॥

उपस्थ इत्युप – स्थे । ते । देवि । अदिते । अग्निम् ।

अन्नादमित्यन्न – अदम् । अन्नाद्यायेत्यन्न – अद्याय । एति ।

दधे ॥ एति । अयम् । गौः । पृश्ञिः । अक्रमीत् । असनत् ।

मातरम् । पुनः ॥ पितरम् । च । प्रयन्निति प्र – यन्न् । सुवः ॥

त्रि॒ꣳशत् । धाम । वीति । राजति । वाक् । पतङ्गाय । शिश्रिये ॥

प्रतीति । अस्य । वह । द्युभिरिति द्यु – भिः । अस्य ।

प्राणादिति प्र – अनात् । अपानतीत्यप – अनती । अन्तः । चरति ।

रोचना ॥ वीति । अख्यत् । महिषः । सुवः ॥ यत् । त्वा । **10 (50)**

**TS 1.5.3.2**

क्रुद्धः परोवप मन्युना यदवर्त्या ।

सुकल्पमग्ने तत्तव पुनस्त्वोद्–दीपयामसि ॥

यत्ते मन्युपरोप्तस्य पृथिवीमनु दद्ध्वसे ।

आदित्या विश्वे तद्–देवा वसवश्च समाभरन्न् ॥

मनो ज्योति र्जुषतामाज्यं ँविच्छिन्नं ँयज्ञ॰ं समिमं दधातु ।

बृहस्पतिस्तनुतामिमं नो विश्वे देवा इह मादयन्तां ॥

सप्त ते अग्ने समिधः सप्त जिह्वाः सप्त – [ ] **11**

**TS 1.5.3.2 (Padam)**

क्रुद्धः । परोवपेति परा – उपव । मन्युना । यत् । अवर्त्या ॥

सुकल्पमिति सु – कल्पम् । अग्ने । तत् । तव । पुनः । त्वा ।

उदिति । दीपयामसि ॥ यत् । ते । मन्युपरोप्तस्येति मन्यु–परोप्तस्य ।

पृथिवीम् । अन्विति । दद्ध्वसे ॥ आदित्याः । विश्वे । तत् । देवाः ।

वसवः । च । समाभरन्निति सं – आभरन्न् ॥ मनः । ज्योतिः ।

जुषताम् । आज्यम् । विच्छिन्नमिति वि – छिन्नम् । यज्ञम् ।

समिति । इमम् । दधातु ॥ बृहस्पतिः । तनुताम् । इमम् । नः ।

विश्वे । देवाः । इह । मादयन्ताम् ॥ सप्त । ते । अग्ने ।

समिध इति सं – इधः । सप्त । जिह्वाः । सप्त । **11 (50)**

**TS 1.5.3.3**

र्.षयः सप्त धाम प्रियाणि ।

सप्त होत्राः सप्तधा त्वा यजन्ति सप्त योनीरा **पृणस्वा** घृतेन ॥

पुनरूर्जा नि वर्तस्व पुनरग्न इषा ऽऽयुषा । पुनर्नः पाहि विश्वतः ॥

सह रय्या नि वर्तस्वाग्ने पिन्वस्व धारया ।

विश्वफ्स्निया विश्वतस्परि ॥

लेकः सलेकः सुलेकस्ते न आदित्या आज्यं जुषाणा वियन्तु केतः

सकेतः सुकेतस्ते न ( ) आदित्या आज्यं जुषाणा वियन्तु विवस्वा॒ँ

अदिति र्देवजूतिस्ते न आदित्या आज्यं जुषाणा वियन्तु ॥ **12**

**TS 1.5.3.3 (Padam)**

ऋषयः । सप्त । धाम । प्रियाणि ॥ सप्त । होत्राः । सप्तधेति
सप्त – धा । त्वा । यजन्ति । सप्त । योनीः । एति । पृणस्व ।
घृतेन ॥ पुनः । ऊर्जा । नीति । वर्तस्व । पुनः । अग्ने । इषा ।
आयुषा ॥ पुनः । नः । पाहि । विश्वतः ॥ सह । रय्या । नीति ।
वर्तस्व । अग्ने । पिन्वस्व । धारया ॥ विश्वफ्स्नियेति
विश्व – फ्स्निया । विश्वतः । परि ॥ लेकः । सलेक इति
स – लेकः । सुलेक इति सु – लेकः । ते । नः । आदित्याः ।
आज्यम् । जुषाणाः । वियन्तु । केतः । सकेत इति स – केतः ।
सुकेत इति सु – केतः । ते । नः ( ) । आदित्याः । आज्यम् ।
जुषाणाः । वियन्तु । विवस्वान् । अदितिः । देवजूतिरिति
देव – जूतिः । ते । नः । आदित्याः । आज्यम् । जुषाणाः ।
वियन्तु ॥ **12 (63)**

**(त्वा–जिह्वाः सप्त–सुकेतस्ते न–स्त्रयोदश च )** *(A3)*

**TS 1.5.4.1**

भूमि भूम्ना द्यौ र्वरिणेत्याहाऽऽशिषैवैनमा धत्तेसर्पा वै जीर्यन्तो ऽमन्यन्त स एतं कसर्णीरः काद्रवेयो मन्त्रमपश्यत् ततो वै ते जीर्णास्तनूरपाघ्नत सर्पराज्ञिया ऋग्भि र्गार्.हपत्यमा दधाति पुनर्नवमेवैनमजरं कृत्वा ऽऽ धत्ते ऽथो पूतमेव पृथिवीमन्नाद्यं नोपानमथ्सैतं – [ ] **13**

**TS 1.5.4.1 (Padam)**

भूमिः । भूम्ना । द्यौः । वरिणा । इति । आह । आशिषेत्या – शिषा । एव । एनम् । एति । धत्ते । सर्पाः । वै । जीर्यन्तः । अमन्यन्त । सः । एतम् । कसर्णीरः । काद्रवेयः । मन्त्रम् । अपश्यत् । ततः । वै । ते । जीर्णाः । तनूः । अपेति । अघ्नत । सर्पराज्ञिया इति सर्प –राज्ञियाः । ऋग्भिरित्यृक् – भिः । गार्.हपत्यमिति गार्.ह – पत्यम् । एति । दधाति । पुनर्नवमिति पुनः– नवम् । एव । एनम् । अजरम् । कृत्वा । एति । धत्ते । अथो इति । पूतम् । एव । पृथिवीम् । अन्नाद्यमित्यन्न – अद्यम् । न । उपेति । अनमत् । सा । एतम् । **13 (50)**

**TS 1.5.4.2**

मन्त्रमपश्यत् ततो वै तामन्नाद्य-मुपानमद्–यथ् सर्पराज्ञिया ऋग्भिर् गार्.हपत्य–मादधात्यन्नाद्यस्या वरुद्ध्या अथो अस्यामेवैनं प्रतिष्ठितमा धत्ते यत्त्वा क्रुद्धः परोवपेत्याहाप ह्नुत एवास्मै तत् पुनस्त्वोद्दीपयामसीत्याह समिन्ध एवैनं ँयत्ते मन्युपरोप्तस्येत्याह देवताभिरेवै – [ ] **14**

**TS 1.5.4.2 (Padam)**

मन्त्रम् । अपश्यत् । ततः । वै । ताम् । अन्नाद्यमित्यन्न – अद्यम् । उपेति । अनमत् । यत् । सर्पराज्ञिया इति सर्प – राज्ञियाः । ऋग्भिरित्यृक् – भिः । गार्.हपत्यमिति गार्.ह – पत्यम् । आदधातीत्या – दधाति । अन्नाद्यस्येत्यन्न – अद्यस्य । अवरुद्ध्या इत्यव – रुद्ध्यै । अथो इति । अस्याम् । एव । एनम् । प्रतिष्ठितमिति प्रति – स्थितम् । एति । धत्ते । यत् । त्वा । क्रुद्धः । परोवपेति परा – उवप । इति । आह । अपेति । ह्नुते । एव । अस्मै । तत् । पुनः । त्वा । उदिति । दीपयामसि । इति । आह ।

समिति । इन्धे । एव । एनम् । यत् । ते । मन्युपरोप्तस्येति

मन्यु – परोप्तस्य । इति । आह । देवताभिः । एव । **14 (50)**

**TS 1.5.4.3**

–नꣳ सं भरति वि वा एतस्य यज्ञश्छिद्यते यो ऽग्निमुद्वासयते

बृहस्पतिवत्यर्चोप तिष्ठते ब्रह्म वै देवानां बृहस्पति र्ब्रह्मणैव

यज्ञꣳ सं दधाति विच्छिन्नं यँज्ञꣳ समिमं दधात्वित्याह सन्तत्यै

विश्वे देवा इह मादयन्तामित्याह सन्तत्यैव यज्ञं देवेभ्यो ऽनु दिशति

सप्त ते अग्ने समिधः सप्त जिह्वा – [ ] **15**

**TS 1.5.4.3 (Padam)**

एनम् । समिति । भरति । वीति । वै । एतस्य । यज्ञः । छिद्यते ।

यः । अग्निम् । उद्वासयत इत्युत् – वासयते । बृहस्पतिवत्येति

बृहस्पति – वत्या । ऋचा । उपेति । तिष्ठते । ब्रह्म । वै । देवानाम् ।

बृहस्पतिः । ब्रह्मणा । एव । यज्ञम् । समिति । दधाति ।

वच्छिन्नमिति वि–छिन्नम् । यज्ञम् । समिति । इमम् । दधातु । इति ।

आह । सन्तत्या इति सं – तत्यै । विश्वे । देवाः । इह । मादयन्ताम् ।

इति । आह । सन्तत्येति सं – तत्य । एव । यज्ञम् । देवेभ्यः ।

अन्विति । दिशति । सप्त । ते । अग्ने । समिध इति सं – इधः ।

सप्त । जिह्वाः । **15 (50)**

**TS 1.5.4.4**

इत्याह सप्तसप्त वै सप्तधा ऽग्नेः प्रियास्तनुवस्ता एवाव रुन्धे पुनरूर्जा सह रय्येत्यभितः पुरोडाशमाहुती जुहोति यजमानमेवोर्जा च रय्या चोभयतः परि गृह्णात्यादित्या वा अस्माल्लोकादमुँ ल्लोकमायन्ते ऽमुष्मिन् ँल्लोके व्यतृष्यन्त इमं ँल्लोकं पुनरभ्यवेत्याग्निमाधायैतान्. ( ) होमानजुहवुस्त आर्द्ध्नुवन्ते सुवर्गं ँल्लोकमायन्. यः पराचीनं पुनराधेयादग्निमादधीत स एतान्. होमान् जुहुयाद् यामेवाऽऽदित्या ऋद्धिमार्द्ध्नुवन् तामेवर्द्ध्नोति ॥ **16**

**TS 1.5.4.4 (Padam)**

इति । आह । सप्तसप्तेति सप्त – सप्त । वै । सप्तधेति सप्त – धा । अग्नेः । प्रियाः । तनुवः । ताः । एव । अवेति । रुन्धे । पुनः । ऊर्जा । सह । रय्या । इति । अभितः । पुरोडाशम् । आहुती इत्या – हुती । जुहोति । यजमानम् । एव । ऊर्जा । च । रय्या । च । उभयतः । परीति । गृह्णाति । आदित्याः । वै । अस्मात् ।

लोकात् । अमुम् । लोकम् । आयन्न् । ते । अमुष्मिन्न् । लोके ।

वीति । अतृष्यन्न् । ते । इमम् । लोकम् । पुनः ।

अभ्यवेत्येत्यभि – अवेत्य । अग्निम् । आधायेत्या – धाय ।

एतान् ( ) । होमान् । अजुहवुः । ते । आर्द्ध्नुवन्न् । ते ।

सुवर्गमिति सुवः – गम् । लोकम् । आयन्न् । यः । पराचीनम् ।

पुनराधेयादिति पुनः – आधेयात् । अग्निम् । आदधीतेत्या– दधीत ।

सः । एतान् । होमान् । जुहुयात् । याम् । एव । आदित्याः ।

ऋद्धिम् । आर्द्ध्नुवन्न् । ताम् । एव । ऋद्ध्नोति ॥ **16 (75)**

**(सैतं–देवताभिरेव–जिह्वा–एतान्–पञ्चविꣳशतिश्च )***(A4)*

**TS 1.5.5.1**

उपप्रयन्तो अद्ध्वरं मन्त्रं वोचेमाग्नये । आरे अस्मे च शृण्वते ॥

अस्य प्रत्नामनु द्युतꣳ शुक्रं दुदुह्रे अह्रयः । पयः सहस्रसामृषिं ॥

अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयं ।

अपाꣳ रेताꣳसि जिन्वति ॥

अयमिह प्रथमो धायि धातृभिर्. होता यजिष्ठो अद्ध्वरेष्वीड्यः ।

यमप्नवानो भृगवो विरुरुचुर्वनेषु चित्रं ँविभुवं ँविशेविशे ॥

उभा वामिन्द्राग्नी आहुवद्ध्या – [ ] 17

TS 1.5.5.1 (Padam)

उपप्रयन्त इत्युप–प्रयन्तः । अद्ध्वरम् । मन्त्रम् । वोचेम । अग्नये ॥

आरे । अस्मे इति । च । शृण्वते ॥ अस्य । प्रत्नाम् । अन्विति ।

द्युतम् । शुक्रम् । दुदुह्रे । अह्रयः ॥ पयः । सहस्रसामिति

सहस्र–साम् । ऋषिम् ॥ अग्निः । मूर्द्धा । दिवः । ककुत् । पतिः ।

पृथिव्याः । अयम् ॥ अपाम् । रेता॑ꣳसि । जिन्वति ॥ अयम् । इह ।

प्रथमः । धायि । धातृभिरिति धातृ – भिः । होता । यजिष्ठः ।

अद्ध्वरेषु । ईड्यः ॥ यम् । अप्नवानः । भृगवः ।

विरुरुचुरिति वि – रुरुचुः । वनेषु । चित्रम् । विभुवमिति

वि – भुवम् । विशेविश इति विशे – विशे ॥ उभा । वाम् ।

इन्द्राग्नी इतीन्द्र – अग्नी । आहुवद्ध्यै । 17 (50)

TS 1.5.5.2

उभा राधसः सह मादयद्ध्यै ।

उभा दाताराविषाꣳ रयीणामुभा वाजस्य सातये हुवे वां ॥

अयं ते योनिर्. ऋत्वियो यतो जातो अरोचथाः ।

तं जानन्नग्न आ रोहा**था** नो **वर्द्धया** रयिं ॥

अग्न आयू॒ꣳषि पवस आ सुवोर्जमिषं च नः ।

आरे बाधस्व दुच्छुनां ॥

अग्ने पवस्व स्वपा अस्मे वर्चः सुवीर्यं ।

दधत् पोषꣳ रयिं – [ ] **18**

**TS 1.5.5.2 (Padam)**

उभा । राधसः । सह । मादयद्ध्यै ॥ उभा । दातारौ । इषाम् ।

रयीणाम् । उभा । वाजस्य । सातये । हुवे । वाम् ॥ अयम् । ते ।

योनिः । ऋत्वियः । यतः । जातः । अरोचथाः ॥ तम् । जानन्न् ।

अग्ने । एति । रोह । अथ । नः । वर्द्धय । रयिम् ॥ अग्ने ।

आयूꣳषि । पवसे । एति । सुव । ऊर्जम् । इषम् । च । नः ॥ आरे ।

बाधस्व । दुच्छुनाम् ॥ अग्ने । पवस्व । स्वपा इति सु – अपाः ।

अस्मे इति । वर्चः । सुवीर्यमिति सु – वीर्यम् ॥ दधत् । पोषम् ।

रयिम् । **18 (50)**

**TS 1.5.5.3**

मयि ॥

अग्ने पावक रोचिषा मन्द्रया देव जिह्वया ।

आ देवान्. वक्षि यक्षि च ॥

स नः पावक दीदिवो ऽग्ने देवाꣳ इहाऽऽ वह ।

उप यज्ञꣳ हविश्च नः ॥

अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः कविः ।

शुची रोचत आहुतः ॥

उदग्ने शुचयस्तव शुक्रा भ्राजन्त ईरते । तव ज्योतीꣷष्यर्चयः ॥

आयुर्दा अग्ने ऽस्यायुर्मे– [ ] **19**

**TS 1.5.5.3 (Padam)**

मयि ॥ अग्ने । पावक । रोचिषा । मन्द्रया । देव । जिह्वया ॥ एति ।

देवान् । वक्षि । यक्षि । च ॥ सः । नः । पावक । दीदिवः । अग्ने ।

देवान् । इह । एति । वह ॥ उपेति । यज्ञम् । हविः । च । नः ॥

अग्निः । शुचिव्रततम इति शुचिव्रत – तमः । शुचिः । विप्रः ।

शुचिः । कविः ॥ शुचिः । रोचते । आहुत इत्या – हुतः ॥ उदिति ।

अग्ने । शुचयः । तव । शुक्राः । भ्राजन्तः । ईरते ॥ तव ।
ज्योतीꣳषि । अर्चयः ॥ आयुर्दा इत्यायुः – दाः । अग्ने । असि ।
आयुः । मे । **19 (50)**

**TS 1.5.5.4**

देहि वर्चोदा अग्ने ऽसि वर्चो मे देहि तनूपा अग्ने ऽसि तनुवं मे
पाह्यग्ने यन्मे तनुवा ऊनं तन्म आ पृण चित्रावसो स्वस्ति ते
पारमशीयेन्धानास्त्वा शतꣳ हिमा द्युमन्तः समिधीमहि वयस्वन्तो
वयस्कृतं ँयशस्वन्तो यशस्कृतꣳ सुवीरासो अदाभ्यं ।
अग्ने सपत्नदंभनं ँवर्.षिष्ठे अधि नाके ॥
सं त्वमग्ने सूर्यस्य वर्चसा ( ) ऽगथाः समृषीणाꣲ स्तुतेन
सं प्रियेण धाम्ना ।
त्वमग्ने सूर्यवर्चा असि सं मामायुषा वर्चसा प्रजया सृज ॥ **20**

**TS 1.5.5.4 (Padam)**

देहि । वर्चोदा इति वर्चः– दाः । अग्ने । असि । वर्चः । मे । देहि ।
तनूपा इति तनू – पाः । अग्ने । असि । तनुवम् । मे । पाहि ।
अग्ने । यत् । मे । तनुवाः । ऊनम् । तत् । मे । एति । पृण ।

चित्रावसो इति चित्र – वसो । स्वस्ति । ते । पारम् । अशीय ।

इन्धानाः । त्वा । शतम् । हिमाः । द्युमन्त इति द्यु– मन्तः । समिति ।

इधीमहि । वयस्वन्तः । वयस्कृतमिति वयः–कृतम् । यशस्वन्तः ।

यशस्कृतमिति यशः – कृतम् । सुवीरास इति सु – वीरासः ।

अदाभ्यम् ॥ अग्ने । सपत्नदंभनमिति सपत्न – दंभनम् । वर्.षिष्ठे ।

अधीति । नाके ॥ समिति । त्वम् । अग्ने । सूर्यस्य । वर्चसा ( ) ।

अगथाः । समिति । ऋषीणाम् । स्तुतेन । समिति । प्रियेण ।

धाम्ना ॥ त्वम् । अग्ने । सूर्यवर्चा इति सूर्य – वर्चाः । असि ।

समिति । माम् । आयुषा । वर्चसा । प्रजयेति प्र – जया ।

सृज ॥ **20 (67)**

**(आहुवद्ध्यै–पोषꣳ रयिं–मे–वर्चसा–सप्तदश च )***(A5)*

**TS 1.5.6.1**

सं पश्यामि प्रजा अह–मिडप्रजसो मानवीः ।

सर्वा भवन्तु नो गृहे ॥

अंभः स्थाम्भो वो भक्षीय महः स्थ महो वो भक्षीय सहः स्थ सहो

वो भक्षीयोर्जः स्थोर्जं ँवो भक्षीय रेवती रमद्ध्व–मस्मिन्

ँलोके ऽस्मिन् गोष्ठे ऽस्मिन् क्षये ऽस्मिन्. योनाविहैव स्तेतो मा ऽप

गात बह्वीर्मे भूयास्त – [ ] **21**

**TS 1.5.6.1 (Padam)**

समिति । पश्यामि । प्रजा इति प्र – जाः । अहम् । इडप्रजस

इतीड – प्रजसः । मानवीः ॥ सर्वाः । भवन्तु । नः । गृहे ॥ अंभः ।

स्थ । अम्भः । वः । भक्षीय । महः । स्थ । महः । वः । भक्षीय ।

सहः । स्थ । सहः । वः । भक्षीय । ऊर्जः । स्थ । ऊर्जम् । वः ।

भक्षीय । रेवतीः । रमद्ध्वम् । अस्मिन्न् । लोके । अस्मिन्न् । गोष्ठ

इति गो–स्थे । अस्मिन्न् । क्षये । अस्मिन्न् । योनौ । इह । एव ।

स्त । इतः । मा । अपेति । गात । बह्वीः । मे । भूयास्त । **21 (50)**

**TS 1.5.6.2**

सꣳहिता ऽसि विश्वरूपीरा मोर्जा विशा ऽऽगौपत्येनाऽऽ रायस्पोषेण

सहस्रपोषं ँवः पुष्यासं मयि वो रायः श्रयन्तां ॥

उप त्वा ऽग्ने दिवेदिवे दोषावस्तर्द्धिया वयं । नमो भरन्त एमसि ॥

राजन्तमद्ध्वराणां गोपामृतस्य दीदिविं । वर्द्धमानꣳ स्वे दमे ॥

स नः पितेव सूनवे ऽग्ने सूपायनो भव । **सचस्वा** नः स्वस्तये ॥

अग्ने – [ ] 22

**TS 1.5.6.2 (Padam)**

स॒ꣳहितेति सं – हिता । असि । विश्वरूपीरिति विश्व – रूपीः ।

एति । मा । ऊर्जा । विश । एति । गौपत्येन । एति । रायः । पोषेण ।

सहस्रपोषमिति सहस्र – पोषम् । वः । पुष्यासम् । मयि । वः ।

रायः । श्रयन्ताम् ॥ उपेति । त्वा । अग्ने । दिवेदिव इति दिवे–दिवे ।

दोषावस्तरिति दोषा–वस्तः । धिया । वयम् ॥ नमः । भरन्तः । एति ।

इमसि ॥ राजन्तम् । अद्ध्वराणाम् । गोपामिति गो–पाम् । ऋतस्य ।

दीदिविम् ॥ वर्धमानम् । स्वे । दमे ॥ सः । नः । पिता । इव ।

सूनवे । अग्ने । सूपायन इति सु – उपायनः । भव ॥ सचस्व ।

नः । स्वस्तये ॥ अग्ने । **22 (50)**

**TS 1.5.6.3**

त्वं नो अन्तमः । उत त्राता शिवो भव वरूथ्यः ॥

तं त्वा शोचिष्ठ दीदिवः । सुम्नाय नूनमीमहे सखिभ्यः ॥

वसुरग्नि र्वसुश्रवाः ।

अच्छा नक्षि द्युमत्तमो रयिं दाः ॥

ऊर्जा वः पश्याम्यूर्जा मा पश्यत रायस्पोषेण वः पश्यामि रायस्पोषेण

मा पश्यतेडाः स्थ मधुकृतः स्योना माऽऽ विशतेरा मदः ।

सहस्रपोषं ँवः पुष्यासं – [ ] 23

**TS 1.5.6.3 (Padam)**

त्वम् । नः । अन्तमः ॥ उत । त्राता । शिवः । भव । वरूथ्यः ॥ तम् ।

त्वा । शोचिष्ठ । दीदिवः ॥ सुम्नाय । नूनम् । ईमहे । सखिभ्य इति

सखि – भ्यः ॥ वसुः । अग्निः । वसुश्रवा इति वसु – श्रवाः ॥

अच्छ । नक्षि । द्युमत्तम इति द्युमत् – तमः । रयिम् । दाः ॥

ऊर्जा । वः । पश्यामि । ऊर्जा । मा । पश्यत । रायः । पोषेण । वः ।

पश्यामि । रायः । पोषेण । मा । पश्यत । इडाः । स्थ । मधुकृत

इति मधु – कृतः । स्योनाः । मा । एति । विशत । इराः ।

मदः ॥ सहस्रपोषमिति सहस्र – पोषम् । वः । पुष्यासम् । 23 (50)

**TS 1.5.6.4**

मयि वो रायः श्रयन्तां ॥

तथ्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ॥

सोमानꣳ स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं ँय औशिजं ॥
कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे ।
उपोपेन्नु मघवन्भूय इन्नु ते दानं देवस्य पृच्यते ॥
परि त्वा ऽग्ने पुरं ँवयं ँविप्रꣳ सहस्य धीमहि ।
धृषद्वर्णं ( ) दिवेदिवे भेत्तारं भङ्गुरावतः ॥
अग्ने गृहपते सुगृहपतिरहं त्वया गृहपतिना भूयासꣳ सुगृहपतिर्मया
त्वं गृहपतिना भूयाः शतꣳ हिमास्तामाशिषमा शासे तन्तवे
ज्योतिष्मतीं तामाशिषमा शासे ऽमुष्मै ज्योतिष्मतीं ॥ **24**

**<u>TS 1.5.6.4 (Padam)</u>**

मयि । वः । रायः । श्रयन्ताम् ॥ तत् । सवितुः । वरेण्यम् । भर्गः ।
देवस्य । धीमहि ॥ धियः । यः । नः । प्रचोदयादिति प्र–चोदयात् ॥
सोमानम् । स्वरणम् । कृणुहि । ब्रह्मणः । पते ॥
कक्षीवन्तमिति कक्षी – वन्तम् । यः । औशिजम् ॥ कदा । चन ।
स्तरीः । असि । न । इन्द्र । सश्चसि । दाशुषे ॥ उपोपेत्युप – उप ।
इत् । नु । मघवन्निति मघ – वन्न् । भूयः । इत् । नु । ते । दानम् ।

देवस्य । पृच्यते ॥ परीति । त्वा । अग्ने । पुरम् । वयम् । विप्रम् ।
सहस्य । धीमहि ॥ धृषद्वर्णमिति धृषत् – वर्णम् ( ) । दिवेदिव इति
दिवे – दिवे । भेत्तारम् । भङ्गुरावत इति भङ्गुर–वतः ॥ अग्ने ।
गृहपत इति गृह – पते । सुगृहपतिरिति सु – गृहपतिः । अहम् ।
त्वया । गृहपतिनेति गृह – पतिना । भूयासम् । सुगृहपतिरिति
सु – गृहपतिः । मया । त्वम् । गृहपतिनेति गृह – पतिना । भूयाः ।
शतम् । हिमाः । ताम् । आशिषमित्या – शिषम् । एति । शासे ।
तन्तवे । ज्योतिष्मतीम् । ताम् । आशिषमित्या – शिषम् । एति ।
शासे । अमुष्मै । ज्योतिष्मतीम् ॥ **24 (79)**

**(भूयास्त–स्वस्तयेऽग्ने–पुष्यासं–धृषद्वर्ण–मेकान्नत्रिंशच्च ) (A6)**

**TS 1.5.7.1**

अयज्ञो वा एष यो ऽसामोपप्रयन्तो अद्ध्वरमित्याह स्तोममेवास्मै
युनक्त्युपेत्याह प्रजा वै पशव उपेमं ँल्लोकं प्रजामेव पशूनिमं
ँल्लोकमुपैत्यस्य प्रत्नामनु द्युतमित्याह सुवर्गो वै लोकः प्रत्नः

सुवर्गमेव लोकꣳ समारोहत्यग्निर्मूर्द्धा दिवः

ककुदित्याह मूर्द्धान– [ ] **25**

**TS 1.5.7.1 (Padam)**

अयज्ञः । वै । एषः । यः । असामा । उपप्रयन्त इत्युप – प्रयन्तः ।

अद्ध्वरम् । इति । आह । स्तोमम् । एव । अस्मै । युनक्ति । उपेति ।

इति । आह । प्रजेति प्र – जा । वै । पशवः । उपेति । इमम् ।

लोकम् । प्रजामिति प्र – जाम् । एव । पशून् । इमम् । लोकम् ।

उपेति । एति । अस्य । प्रत्नाम् । अन्विति । द्युतम् । इति । आह ।

सुवर्ग इति सुवः – गः । वै । लोकः । प्रत्नः ।

सुवर्गमिति सुवः – गम् । एव । लोकम् । समारोहतीति

सं – आरोहति । अग्निः । मूर्द्धा । दिवः । ककुत् । इति । आह ।

मूर्द्धानम् । **25 (50)**

**TS 1.5.7.2**

मेवैनꣳ समानानां करोत्यथो देवलोकादेव मनुष्यलोके प्रति

तिष्ठत्ययमिह प्रथमो धायि धातृभिरित्याह मुख्यमेवैनं करोत्युभा

वामिन्द्राग्नी आहुवद्ध्या इत्याहौजो बलमेवाव रुन्धे ऽयं ते योनिर्.

ऋत्विय इत्याह पशवो वै रयिः पशूनेवाव रुन्धे षड्भिरुप

तिष्ठते षड् वा – [ ] **26**

**TS 1.5.7.2 (Padam)**

एव । एनम् । समानानाम् । करोति । अथो इति । देवलोकादिति

देव – लोकात् । एव । मनुष्यलोक इति मनुष्य – लोके । प्रतीति ।

तिष्ठति । अयम् । इह । प्रथमः । धायि । धातृभिरिति धातृ – भिः ।

इति । आह । मुख्यम् । एव । एनम् । करोति । उभा । वाम् ।

इन्द्राग्नी इतीन्द्र – अग्नी । आहुवद्ध्यै । इति । आह । ओजः ।

बलम् । एव । अवेति । रुन्धे । अयम् । ते । योनिः । ऋत्वियः ।

इति । आह । पशवः । वै । रयिः । पशून् । एव । अवेति । रुन्धे ।

षड्भिरिति षट् – भिः । उपेति । तिष्ठते । षट् । वै । **26 (50)**

**TS 1.5.7.3**

ऋतव ऋतुष्वेव प्रति तिष्ठति षड्भिरुत्तराभिरुप तिष्ठते द्वादश

संपद्यन्ते द्वादश मासाः सँवथ्सरः सम्ँवथ्सर एव प्रति तिष्ठति यथा

वै पुरुषो ऽश्वो गौर्जीर्यत्येव–मग्निराहितो जीर्यति सम्ँवथ्सरस्य

परस्तादाग्निपावमानीभि-रुप तिष्ठते पुनर्नव–मेवैन–मजरं करोत्यथो

पुनात्येवोप तिष्ठते योग एवास्यैष उप तिष्ठते – [ ] **27**

**TS 1.5.7.3 (Padam)**

ऋतवः । ऋतुषु । एव । प्रतीति । तिष्ठति । षड्भिरिति षट् – भिः ।

उत्तराभिरित्युत् – तराभिः । उपेति । तिष्ठते । द्वादश । समिति ।

पद्यन्ते । द्वादश । मासाः । सम्ँवथ्सर इति सं – वथ्सरः ।

सम्ँवथ्सर इति सं – वथ्सरे । एव । प्रतीति । तिष्ठति । यथा । वै ।

पुरुषः । अश्वः । गौः । जीर्यति । एवम् । अग्निः ।

आहित इत्या – हितः । जीर्यति । सम्ँवथ्सरस्येति सं–वथ्सरस्य ।

परस्तात् । आग्निपावमानीभिरित्याग्नि – पावमानीभिः । उपेति ।

तिष्ठते । पुनर्नवमिति पुनः–नवम् । एव । एनम् । अजरम् । करोति ।

अथो इति । पुनाति । एव । उपेति । तिष्ठते । योगः । एव । अस्य ।

एषः । उपेति । तिष्ठते । **27 (50)**

**TS 1.5.7.4**

दम एवास्यैष उप तिष्ठते याच्ञैवास्यैषोप तिष्ठते यथा पापीयाञ्छ्रेयस

आहृत्य नमस्यति तादृगेव तदायुर्दा अग्ने ऽस्यायुर्मे देहीत्याहा ऽऽयुर्दा

ह्येष वर्चोदा अग्ने ऽसि वर्चो मे देहीत्याह वर्चोदा ह्येष तनूपा अग्ने ऽसि तनुवं मे पाहीत्याह – [ ] **28**

**TS 1.5.7.4 (Padam)**

दमः । एव । अस्य । एषः । उपेति । तिष्ठते । याच्ञा । एव ।
अस्य । एषा । उपेति । तिष्ठते । यथा । पापीयान् । श्रेयसे ।
आहृत्येत्या – हृत्य । नमस्यति । तादृक् । एव । तत् ।
आयुर्दा इत्यायुः – दाः । अग्ने । असि । आयुः । मे । देहि । इति ।
आह । आयुर्दा इत्यायुः – दाः । हि । एषः । वर्चोदा इति
वर्चः – दाः । अग्ने । असि । वर्चः । मे । देहि । इति । आह ।
वर्चोदा इति वर्चः – दाः । हि । एषः । तनूपा इति तनू – पाः ।
अग्ने । असि । तनुवम् । मे । पाहि । इति । आह । **28 (50)**

**TS 1.5.7.5**

तनूपा ह्येषो ऽग्ने यन्मे तनुवा ऊनं तन्म आ पृणेत्याह यन्मे प्रजायै पशूनामूनं तन्म आ पूरयेति वावैतदाहचित्रावसो स्वस्ति ते पारमशीयेत्याह रात्रिर्वै चित्रावसुरव्युष्ट्यै वा एतस्यै पुरा ब्राह्मणा अभैषुर्व्युष्टिमेवाव रुन्ध इन्धानास्त्वा शतꣳ – [ ] **29**

**TS 1.5.7.5 (Padam)**

तनूपा इति तनू – पाः । हि । एषः । अग्ने । यत् । मे । तनुवाः ।

ऊनम् । तत् । मे । एति । पृण । इति । आह । यत् । मे । प्रजाया

इति प्र – जायै । पशूनाम् । ऊनम् । तत् । मे । एति । पूरय ।

इति । वाव । एतत् । आह । चित्रावसो इति चित्र – वसो ।

स्वस्ति । ते । पारम् । अशीय । इति । आह । रात्रिः । वै ।

चित्रावसुरिति चित्र – वसुः । अव्युष्ट्या इत्यवि – उष्ट्यै । वै ।

एतस्यै । पुरा । ब्राह्मणाः । अभैषुः । व्युष्टिमिति वि – उष्टिम् । एव ।

अवेति । रुन्धे । इन्धानाः । त्वा । शतम् । **29 (50)**

**TS 1.5.7.6**

हिमा इत्याह शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रति तिष्ठत्येषा

वै सूर्मी कर्णकावत्येतया ह स्म वै देवा असुराणा๎ शततर्.हा๎

स्तृ๎हन्ति यदेतया समिधमादधाति वज्रमेवैतच्छतघ्नीं ँयजमानो

भ्रातृव्याय प्र हरति स्तृत्या अछंबट्कार๎ सं त्वमग्ने सूर्यस्य वर्चसा

ऽगथा इत्याहैतत् त्वमसीदमहं ( ) भूयासमिति वावैतदाह त्वमग्ने

सूर्यवर्चा असीत्याहाऽऽशिषमेवैतामा शास्ते ॥ **30**

**TS 1.5.7.6 (Padam)**

हिमाः । इति । आह । शतायुरिति शत – आयुः । पुरुषः । शतेन्द्रिय

इति शत – इन्द्रियः । आयुषि । एव । इन्द्रिये । प्रतीति । तिष्ठति ।

एषा । वै । सूर्मी । कर्णकावतीति कर्णक–वती । एतया । ह । स्म ।

वै । देवाः । असुराणाम् । शततर्.हानिति शत – तर्.हान् ।

तृ॒ꣳहन्ति । यत् । एतया । समिधमिति सं–इधम् ।

आदधातीत्या – दधाति । वज्रम् । एव । एतत् । शतघ्नीमिति

शत – घ्नीम् । यजमानः । भ्रातृव्याय । प्रेति । हरति । स्तृत्यै ।

अछंबट्कारमित्यछंबट् – कारम् । समिति । त्वम् । अग्ने । सूर्यस्य ।

वर्चसा । अगथाः । इति । आह । एतत् । त्वम् । असि । इदम् ।

अहम् ( ) । भूयासम् । इति । वाव । एतत् । आह । त्वम् । अग्ने ।

सूर्यवर्चा इति सूर्य – वर्चाः । असि । इति । आह ।

आशिषमित्या – शिषम् । एव । एताम् । एति । शास्ते ॥ **30 (66)**

**(मूर्द्धानꣳ–षड्वा–एष उप तिष्ठते–पाहीत्याह–शत–महꣳ**

**षोडश च)** *(A7)*

**TS 1.5.8.1**

सं पश्यामि प्रजा अहमित्याह यावन्त एव ग्राम्याः पशवस्तानेवाव रुन्धे ऽम्भः स्थाम्भो वो भक्षीयेत्याहाम्भो ह्येता महः स्थ महो वो भक्षीयेत्याह महो ह्येताः सहः स्थ सहो वो भक्षीयेत्याह सहो ह्येता ऊर्जः स्थोर्जं वो भक्षीयेत्या – [ ] **31**

**TS 1.5.8.1 (Padam)**

समिति । पश्यामि । प्रजा इति प्र – जाः । अहम् । इति । आह । यावन्तः । एव । ग्राम्याः । पशवः । तान् । एव । अवेति । रुन्धे । अंभः । स्थ । अंभः । वः । भक्षीय । इति । आह । अंभः । हि । एताः । महः । स्थ । महः । वः । भक्षीय । इति । आह । महः । हि । एताः । सहः । स्थ । सहः । वः । भक्षीय । इति । आह । सहः । हि । एताः । ऊर्जः । स्थ । ऊर्जम् । वः । भक्षीय । इति । **31 (50)**

**TS 1.5.8.2**

–होर्जो ह्येता रेवती रमद्ध्वमित्याह पशवो वै रेवतीः पशूनेवात्मन् रमयत इहैव स्तेतो मा ऽप गातेत्याह ध्रुवा एवैना अनपगाः कुरुत

इष्टकचिद्–वा अन्यो ऽग्निः पशुचिदन्यः स<sup>ं</sup>हिता ऽसि विश्वरूपीरिति वथ्समभि मृशत्युपैवैनं धत्ते पशुचितमेनं कुरुते प्र – [ ] **32**

**TS 1.5.8.2 (Padam)**

आह । ऊर्जः । हि । एताः । रेवतीः । रमद्ध्वम् । इति । आह । पशवः । वै । रेवतीः । पशून् । एव । आत्मन्न् । रमयते । इह । एव । स्त । इतः । मा । अपेति । गात । इति । आह । ध्रुवाः । एव । एनाः । अनपगा इत्यनप–गाः । कुरुते । इष्टकचिदितीष्टक–चित् । वै । अन्यः । अग्निः । पशुचिदिति पशु – चित् । अन्यः । स<sup>ं</sup>हितेति सं – हिता । असि । विश्वरूपीरिति विश्व – रूपीः । इति । वथ्सम् । अभीति । मृशति । उपेति । एव । एनम् । धत्ते । पशुचितमिति पशु – चितम् । एनम् । कुरुते । प्रेति । **32 (50)**

**TS 1.5.8.3**

वा एषो ऽस्माल्लोकाच्च्यवते य आहवनीयमुप तिष्ठते गार्.हपत्य-मुपतिष्ठते ऽस्मिन्नेव लोके प्रति तिष्ठत्यथो गार्.हपत्यायैव नि ह्नुते गायत्रीभिरुप तिष्ठते तेजो वै गायत्री तेज एवात्मन् धत्ते ऽथो यदेतं

तृचमन्वाह सन्तत्यै गार्.हपत्यं ँवा अनु द्विपादो वीराः प्र जायन्ते

य एवं ँविद्वान् द्विपदाभि गार्.हपत्य–मुपतिष्ठत – [ ] **33**

**TS 1.5.8.3 (Padam)**

वै । एषः । अस्मात् । लोकात् । च्यवते । यः ।

आहवनीयमित्या – हवनीयम् । उपतिष्ठत इत्युप – तिष्ठते ।

गार्.हपत्यमिति गार्.ह – पत्यम् । उपेति । तिष्ठते । अस्मिन्न् ।

एव । लोके । प्रतीति । तिष्ठति । अथो इति ।

गार्.हपत्यायेति गार्.ह – पत्याय । एव । नीति । ह्नुते । गायत्रीभिः ।

उपेति । तिष्ठते । तेजः । वै । गायत्री । तेजः । एव । आत्मन्न् ।

धत्ते । अथो इति । यत् । एतम् । तृचम् । अन्वाहेत्यनु – आह ।

सन्तत्या इति सं – तत्यै । गार्.हपत्यमिति गार्.ह – पत्यम् । वै ।

अन्विति । द्विपाद इति द्वि – पादः । वीराः । प्रेति । जायन्ते । यः ।

एवम् । विद्वान् । द्विपदाभिरिति द्वि – पदाभिः । गार्.हपत्यमिति

गार्.ह – पत्यम् । उपतिष्ठत इत्युप – तिष्ठते । **33 (50)**

**TS 1.5.8.4**

आ ऽस्य वीरो जायत ऊर्जा वः पश्याम्यूर्जा मा पश्यतेत्याहा

ऽऽशिषमेवैतामा शास्ते तथ्सवितुर्वरेण्यमित्याह प्रसूत्यै सोमान७

स्वरणमित्याह सोमपीथमेवाव रुन्धे कृणुहि ब्रह्मणस्पत इत्याह

ब्रह्मवर्चसमेवाव रुन्धेकदा चन स्तरीरसीत्याह न स्तरी८

रात्रिं वसति – [ ] **34**

**TS 1.5.8.4 (Padam)**

एति । अस्य । वीरः । जायते । ऊर्जा । वः । पश्यामि । ऊर्जा ।

मा । पश्यत । इति । आह । आशिषमित्या – शिषम् । एव ।

एताम् । एति । शास्ते । तत् । सवितुः । वरेण्यम् । इति । आह ।

प्रसूत्या इति प्र – सूत्यै । सोमानम् । स्वरणम् । इति । आह ।

सोमपीथमिति सोम – पीथम् । एव । अवेति । रुन्धे । कृणुहि ।

ब्रह्मणः । पते । इति । आह । ब्रह्मवर्चसमिति ब्रह्म–वर्चसम् । एव ।

अवेति । रुन्धे । कदा । चन । स्तरीः । असि । इति । आह । न ।

स्तरीम् । रात्रिम् । वसति । **34 (50)**

**TS 1.5.8.5**

य एवं ँविद्वानग्नि–मुपतिष्ठते परि त्वा ऽग्ने पुरं ँवयमित्याह

परिधिमेवैतं परि दधात्यस्कन्दायाग्ने गृहपत इत्याह

यथायजुरेवैतच्छत९ं हिमा इत्याह शतं त्वा हेमन्तानिन्धिषीयेति

वावैतदाह पुत्रस्य नाम गृह्णात्यन्नादमेवैनं करोति तामाशिषमा शासे

तन्तवे ज्योतिष्मतीमिति ब्रूयाद्–यस्य पुत्रो ऽजातः स्यात्

तेजस्व्येवास्य ब्रह्मवर्चसी पुत्रो जायते तामाशिषमा शासे ऽमुष्मै

ज्योतिष्मती ( ) मिति ब्रूयाद्–यस्य पुत्रो जातः स्यात् तेज एवास्मिन्

ब्रह्मवर्चसं दधाति ॥ **35**

**TS 1.5.8.5 (Padam)**

यः । एवम् । विद्वान् । अग्निम् । उपतिष्ठत इत्युप – तिष्ठते । परीति ।

त्वा । अग्ने । पुरम् । वयम् । इति । आह । परिधिमिति परि–धिम् ।

एव । एतम् । परीति । दधाति । अस्कन्दाय । अग्ने । गृहपत इति

गृह – पते । इति । आह । यथायजुरिति यथा – यजुः । एव ।

एतत् । शतम् । हिमाः । इति । आह । शतम् । त्वा । हेमन्तान् ।

इन्धिषीय । इति । वाव । एतत् । आह । पुत्रस्य । नाम । गृह्णाति ।

अन्नादमित्यन्न – अदम् । एव । एनम् । करोति । ताम् । आशिष मित्या–शिषम् । एति । शासे । तन्तवे । ज्योतिष्मतीम् ( ) । इति । ब्रूयात् । यस्य । पुत्रः । अजातः । स्यात् । तेजस्वी । एव । अस्य । ब्रह्मवर्चसीति ब्रह्म – वर्चसी । पुत्रः । जायते । ताम् । आशिषमित्या – शिषम् । एति । शासे । अमुष्मै । ज्योतिष्मतीम् । इति । ब्रूयात् । यस्य । पुत्रः । जातः । स्यात् । तेजः । एव । अस्मिन्न् । ब्रह्मवर्चसमिति ब्रह्म – वर्चसम् । दधाति ॥ **35 (79)**

**(ऊर्जंँ वो भक्षीयेति–प्र–गार्.हपत्यमुपतिष्ठते–वसति–ज्योतिष्मती–मेकान्नत्रिँशच्च)** *(A8)*

**TS 1.5.9.1**

अग्निहोत्रं जुहोति यदेव किं च यजमानस्य स्वं तस्यैव तद्–रेतः सिञ्चति प्रजनने प्रजननँ हि वा अग्निरथौषधीरन्तगता दहति तास्ततो भूयसीः प्र जायन्ते यथ्सायं जुहोति रेत एव तथ्सिञ्चति प्रैव प्रातस्तनेन जनयति तद्–रेतः सिक्तं न त्वष्ट्रा ऽविकृतं प्र जायते यावच्छो वै रेतसः सिक्तस्य – [ ] **36**

**TS 1.5.9.1 (Padam)**

अग्निहोत्रमित्यग्नि – होत्रम् । जुहोति । यत् । एव । किम् । च ।
यजमानस्य । स्वम् । तस्य । एव । तत् । रेतः । सिञ्चति । प्रजनन
इति प्र – जनने । प्रजननमिति प्र – जननम् । हि । वै । अग्निः ।
अथ । ओषधीः । अन्तगता इत्यन्त – गताः । दहति । ताः । ततः ।
भूयसीः । प्रेति । जायन्ते । यत् । सायम् । जुहोति । रेतः । एव ।
तत् । सिञ्चति । प्रेति । एव । प्रातस्तनेनेति प्रातः – तनेन ।
जनयति । तत् । रेतः । सिक्तम् । न । त्वष्ट्रा ।
अविकृतमित्यवि – कृतम् । प्रेति । जायते । यावच्छ इति
यावत् – शः । वै । रेतसः । सिक्तस्य । **36 (50)**

**TS 1.5.9.2**

त्वष्टा रूपाणि विकरोति तावच्छो वै तत् प्र जायत एष वै दैव्यस्त्वष्टा
यो यजते बह्वीभिरुप तिष्ठते रेतस एव सिक्तस्य बहुशो रूपाणि वि
करोति स प्रैव जायते श्वःश्वो भूयान् भवति य एवं
ँविद्वानग्निमुपतिष्ठते ऽहर्देवानामासीद्–रात्रिरसुराणां ते ऽसुरा
यद्–देवानां ँवित्तं ँवेद्यमासीत् तेन सह– [ ] **37**

**TS 1.5.9.2 (Padam)**

त्वष्टा । रूपाणि । विकरोतीति वि – करोति । तावच्छ इति

तावत्–शः । वै । तत् । प्रेति । जायते । एषः । वै । दैव्यः । त्वष्टा ।

यः । यजते । बह्वीभिः । उपेति । तिष्ठते । रेतसः । एव । सिक्तस्य ।

बहुश इति बहु – शः । रूपाणि । वीति । करोति । सः । प्रेति ।

एव । जायते । श्वःश्व इति श्वः – श्वः । भूयान् । भवति । यः ।

एवम् । विद्वान् । अग्निम् । उपतिष्ठत इत्युप – तिष्ठते । अहः ।

देवानाम् । आसीत् । रात्रिः । असुराणाम् । ते । असुराः ।

यत् । देवानाम् । वित्तम् । वेद्यम् । आसीत् । तेन । सह । **37 (50)**

**TS 1.5.9.3**

रात्रिं प्राविशन्ते देवा हीना अमन्यन्त ते ऽपश्यन्नाग्नेयी रात्रिराग्नेयाः

पशव इममेवाग्नि७ स्तवाम स नः स्तुतः पशून् पुनर्दास्यतीति ते

ऽग्निमस्तुवन्थ्स एभ्यः स्तुतो रात्रिया अध्यहरभि पशून्निरार्जत् ते

देवाः पशून्. वित्त्वा कामा७ं अकुर्वत य एवं ँविद्वानग्निमुपतिष्ठते

पशुमान् भव– [ ] **38**

**TS 1.5.9.3 (Padam)**

रात्रिम् । प्रेति । अविशन्न् । ते । देवाः । हीनाः । अमन्यन्त । ते ।
अपश्यन्न् । आग्नेयी । रात्रिः । आग्नेयाः । पशवः । इमम् । एव ।
अग्निम् । स्तवाम । सः । नः । स्तुतः । पशून् । पुनः । दास्यति ।
इति । ते । अग्निम् । अस्तुवन्न् । सः । एभ्यः । स्तुतः । रात्रियाः ।
अधीति । अहः । अभीति । पशून् । निरिति । आर्जत् । ते । देवाः ।
पशून् । वित्त्वा । कामान् । अकुर्वत । यः । एवम् । विद्वान् ।
अग्निम् । उपतिष्ठत इत्युप – तिष्ठते । पशुमानिति पशु – मान् ।
भवति । **38 (50)**

**TS 1.5.9.4**

त्यादित्यो वा अस्माल्लोकादमुं ँल्लोकमैथ्सो ऽमुँल्लोकं गत्वा पुनरिमं
ँल्लोकमभ्यद्ध्यायथ् स इमं ँल्लोकमागत्य मृत्योरबिभेन्मृत्युसँयुत
इव ह्ययं ँल्लोकः सो ऽमन्यतेम–मेवाग्निँ स्तवानि स मा स्तुतः
सुवर्गं ँल्लोकं गमयिष्यतीति सो ऽग्निमस्तौथ् स एनँ स्तुतः सुवर्गं
ँल्लोकमगमयद् य – [ ] **39**

**TS 1.5.9.4 (Padam)**

आदित्यः । वै । अस्मात् । लोकात् । अमुम् । लोकम् । ऐत् । सः ।

अमुम् । लोकम् । गत्वा । पुनः । इमम् । लोकम् । अभीति ।

अद्ध्यायत् । सः । इमम् । लोकम् । आगत्येत्या – गत्य । मृत्योः ।

अबिभेत् । मृत्युसम्ँयुत इति मृत्यु–सम्ँयुतः । इव । हि । अयम् ।

लोकः । सः । अमन्यत । इमम् । एव । अग्निम् । स्तवानि । सः ।

मा । स्तुतः । सुवर्गमिति सुवः–गम् । लोकम् । गमयिष्यति । इति ।

सः । अग्निम् । अस्तौत् । सः । एनम् । स्तुतः ।

सुवर्गमिति सुवः – गम् । लोकम् । अगमयत् । यः । **39 (50)**

**TS 1.5.9.5**

एवं ँविद्वानग्निमुपतिष्ठते सुवर्गमेव लोकमेति सर्वमायुरेत्यभि

वा एषो ऽग्नी आ रोहति य एनावुपतिष्ठते यथा खलु वै

श्रेयानभ्यारूढः कामयते तथा करोति नक्तमुप तिष्ठते न प्रातः

स७ँ हि नक्तं ँव्रतानि सृज्यन्ते सह श्रेया७ँश्च पापीया७ँ श्चासाते

ज्योतिर्वा अग्निस्तमो रात्रिर्य – [ ] **40**

**TS 1.5.9.5 (Padam)**

एवम् । विद्वान् । अग्निम् । उपतिष्ठत इत्युप – तिष्ठते । सुवर्गमिति

सुवः – गम् । एव । लोकम् । एति । सर्वम् । आयुः । एति ।

अभीति । वै । एषः । अग्नी इति । एति । रोहति । यः । एनौ ।

उपतिष्ठत इत्युप – तिष्ठते । यथा । खलु । वै । श्रेयान् ।

अभ्यारूढ इत्यभि – आरूढः । कामयते । तथा । करोति । नक्तम् ।

उपेति । तिष्ठते । न । प्रातः । समिति । हि । नक्तम् । व्रतानि ।

सृज्यन्ते । सह । श्रेयान् । च । पापीयान् । च । आसाते इति ।

ज्योतिः । वै । अग्निः । तमः । रात्रिः । यत् । **40 (50)**

**TS 1.5.9.6**

न्नक्तमुपतिष्ठते ज्योतिषैव तमस्तरत्युपस्थेयो ऽग्नी(3) र्नोपस्थेया(3)

इत्याहुर्मनुष्यायेन् न्वै यो ऽहरहराहृत्या ऽथैनं ँयाचति स इन् न्वै

तमुपार्च्छत्यथ को देवानहरहर् याचिष्यतीति तस्मान्नोपस्थेयो ऽथो

खल्वाहुराशिषे वै कं ँयजमानो यजत इत्येषा खलु वा – [ ] **41**

**TS 1.5.9.6 (Padam)**

नक्तम् । उपतिष्ठत इत्युप – तिष्ठते । ज्योतिषा । एव । तमः । तरति । उपस्थेय इत्युप – स्थेयः । अग्नी(३)ः । न । उपस्थेया(३) इत्युप–स्थेया(३)ः । इति । आहुः । मनुष्याय । इत् । नु । वै । यः । अहरहरित्यहः – अहः । आहृत्येत्या – हृत्य । अथ । एनम् । याचति । सः । इत् । नु । वै । तम् । उपेति । ऋच्छति । अथ । कः । देवान् । अहरहरित्यहः–अहः । याचिष्यति । इति । तस्मात् । न । उपस्थेय इत्युप – स्थेयः । अथो इति । खलु । आहुः । आशिष इत्या – शिषे । वै । कम् । यजमानः । यजते । इति । एषा । खलु । वै । **41 (50)**

**TS 1.5.9.7**

आहिताग्नेराशी र्यदग्निमुपतिष्ठते तस्मादुपस्थेयः प्रजापतिः पशूनसृजत ते सृष्टा अहोरात्रे प्राविशन् ताञ्छन्दोभि-रन्वविन्दद्–यच्छन्दोभि–रुपतिष्ठते स्वमेव तदन्विच्छति न तत्र जाम्यस्ती–त्याहुर्यो ऽहरहरुप तिष्ठत इति यो वा अग्निं प्रत्यङ्ङुप तिष्ठते प्रत्येनमोषति यः पराङ् विष्वङ् प्रजया पशुभि ( ) रेति

कवातिर्यङ्ङिवोप तिष्ठेत नैनं प्रत्योषति न विष्वङ्

प्रजया पशुभिरेति ॥ **42**

**TS 1.5.9.7 (Padam)**

आहिताग्नेरित्याहित–अग्नेः । आशीरित्या – शीः । यत् । अग्निम् ।

उपतिष्ठत इत्युप – तिष्ठते । तस्मात् । उपस्थेय इत्युप – स्थेयः ।

प्रजापतिरिति प्रजा – पतिः । पशून् । असृजत । ते । सृष्टाः ।

अहोरात्रे इत्यहः – रात्रे । प्रेति । अविशन्न् । तान् । छन्दोभिरिति

छन्दः–भिः । अन्विति । अविन्दत् । यत् । छन्दोभिरिति छन्दः–भिः ।

उपतिष्ठत इत्युप – तिष्ठते । स्वम् । एव । तत् । अन्विति । इच्छति ।

न । तत्र । जामि । अस्ति । इति । आहुः । यः ।

अहरहरित्यहः – अहः । उपतिष्ठत इत्युप – तिष्ठते । इति । यः ।

वै । अग्निम् । प्रत्यङ्ङ् । उपतिष्ठत इत्युप – तिष्ठते । प्रतीति । एनम् ।

ओषति । यः । पराङ् । विष्वङ्ङ् । प्रजयेति प्र – जया । पशुभिरिति

पशु – भिः ( ) । एति । कवातिर्यङ्ङिति कवा – तिर्यङ्ङ् । इव ।

उपेति । तिष्ठेत । न । एनम् । प्रत्योषतीति प्रति – ओषति । न ।

विष्वङ्ङ् । प्रजयेति प्र – जया । पशुभिरिति पशु – भिः ।
एति ॥ 42 (63) **(सिक्तस्य–सह–भवति–यो–यत्–खलु वै–पशुभि–स्त्रयोदश च)** *(A9)*

**TS 1.5.10.1**

मम नाम प्रथमं जातवेदः पिता माता च दधतुर्यदग्रे ।
तत्त्वं बिभृहि पुनरा मदैतोस्तवाहं नाम बिभराण्यग्ने ॥
मम नाम तव च जातवेदो वाससी इव विवसानौ ये चरावः ।
आयुषे त्वं जीवसे वयं यथायथं वि परि दधावहै पुनस्ते ॥
नमो ऽग्नये ऽप्रतिविद्धाय नमो ऽनाधृष्टाय नमः सम्राजे ।
अषाढो – [ ] 43

**TS 1.5.10.1 (Padam)**

मम । नाम । प्रथमम् । जातवेद इति जात – वेदः । पिता । माता ।
च । दधतुः । यत् । अग्रे ॥ तत् । त्वम् । बिभृहि । पुनः । एति ।
मत् । ऐतोरित्या – एतोः । तव । अहम् । नाम । बिभराणि ।
अग्ने ॥ मम । नाम । तव । च । जातवेद इति जात – वेदः ।
वाससी इति । इव । विवसानाविति वि–वसानौ । ये इति । चरावः ॥

आयुषे । त्वम् । जीवसे । वयम् । यथायथमिति यथा–यथम् । वि ।
परीति । दधावहै । पुनः । ते इति ॥ नमः । अग्नये ।
अप्रतिविद्धायेत्यप्रति – विद्धाय । नमः । अनाधृष्टायेत्यना – धृष्टाय ।
नमः । सम्राज इति सं – राजे ॥ अषाढः । **43 (50)**

**<u>TS 1.5.10.2</u>**

अग्निर्बृहद्वया विश्वजित्सहन्त्यः श्रेष्ठो गन्धर्वः ॥
त्वत्पितारो अग्ने देवा–स्त्वामाहुतय-स्त्वद्विवाचनाः ।
सं मामायुषा सं गौपत्येन सुहिते मा धाः ॥
अयमग्निः श्रेष्ठतमो ऽयं भगवत्तमो ऽय७ं सहस्रसातमः ।
अस्मा अस्तु सुवीर्यं ॥
मनो ज्योति र्जुषतामाज्यं ँविच्छिन्नं ँयज्ञ७ं समिमं दधातु ।
या इष्टा उषसो निम्रुचश्च ताः सं दधामि हविषा घृतेन ॥
पयस्वतीरोषधयः – [ ] **44**

**<u>TS 1.5.10.2 (Padam)</u>**

अग्निः । बृहद्वया इति बृहत् – वयाः । विश्वजिदिति विश्व – जित् ।
सहन्त्यः । श्रेष्ठः । गन्धर्वः ॥ त्वत्पितार इति त्वत्–पितारः । अग्ने ।

देवाः । त्वामाहुतय इति त्वाम् – आहुतयः । त्वद्विवाचना इति त्वत् – विवाचनाः ॥ समिति । माम् । आयुषा । समिति । गौपत्येन । सुहित इति सु – हिते । मा । धाः ॥ अयम् । अग्निः । श्रेष्ठतम इति श्रेष्ठ – तमः । अयम् । भगवत्तम इति भगवत्–तमः । अयम् । सहस्रसातम इति सहस्र – सातमः ॥ अस्मै । अस्तु । सुवीर्यमिति सु – वीर्यम् ॥ मनः । ज्योतिः । जुषताम् । आज्यम् । विच्छिन्नमिति वि – छिन्नम् । यज्ञम् । समिति । इमम् । दधातु ॥ याः । इष्टाः । उषसः । निम्रुच इति नि–म्रुचः । च । ताः । समिति । दधामि । हविषा । घृतेन ॥ पयस्वतीः । ओषधयः । **44 (50)**

**<u>TS 1.5.10.3</u>**

पयस्वद्–वीरुधां पयः ।

अपां पयसो यत्पयस्तेन मामिन्द्र सꣳ सृज ॥

अग्ने व्रतपते व्रतं चरिष्यामि तच्छकेयं तन्मे राद्ध्यतां ॥

अग्निꣳ होतारमिह तꣳ हुवे देवान्. यज्ञियानिह यान्. हवामहे ॥

आ यन्तु देवाः सुमनस्यमाना वियन्तु देवा हविषो मे अस्य ॥

कस्त्वा युनक्ति स त्वा युनक्तु यानि घर्मे

कपालान्युपचिन्वन्ति–[ ] **45**

**TS 1.5.10.3 (Padam)**

पयस्वत् । वीरुधाम् । पयः ॥ अपाम् । पयसः । यत् । पयः । तेन ।

माम् । इन्द्र । समिति । सृज ॥ अग्ने । व्रतपत इति व्रत – पते ।

व्रतम् । चरिष्यामि । तत् । शकेयम् । तत् । मे । राद्ध्यताम् ॥

अग्निम् । होतारम् । इह । तम् । हुवे । देवान् । यज्ञियान् । इह ।

यान् । हवामहे ॥ एति । यन्तु । देवाः । सुमनस्यमाना इति

सु – मनस्यमानाः । वियन्तु । देवाः । हविषः । मे । अस्य ॥ कः ।

त्वा । युनक्ति । सः । त्वा । युनक्तु । यानि । घर्मे । कपालानि ।

उपचिन्वन्तीत्युप – चिन्वन्ति । **45 (50)**

**TS 1.5.10.4**

वेधसः ।

पूष्णस्तान्यपि व्रत इन्द्रवायू वि मुञ्चतां ॥

अभिन्नो घर्मो जीरदानुर्यत आत्त–स्तदगन् पुनः ।

इद्ध्मो वेदिः परिधयश्च सर्वे यज्ञस्याऽऽयुरनु सं चरन्ति ॥

त्रयस्त्रि॒ꣳशत् तन्त॑वो॒ ये वि॑तत्नि॒रे य इ॒मं ॅ॒यज्ञꣳ स्व॒धया॒ दद॑न्ते॒

तेषां᳚ छि॒न्नं प्रत्ये॒तद्द॑धामि॒ स्वाहा॑ घ॒र्मो दे॒वाꣳ अप्ये॑तु ॥ **46**

**TS 1.5.10.4 (Padam)**

वे॒धसः॑ ॥ पू॒ष्णः । तानि॑ । अपीति॑ । व्र॒ते । इ॒न्द्र॒वा॒यू इ॑तीन्द्र – वा॒यू ।

वीति॑ । मु॒ञ्च॒ता॒म् ॥ अ॒भिन्नः॑ । घ॒र्मः । जी॒रदा॑नु॒रिति॑ जी॒र – दा॒नुः॒ ।

यतः॑ । आत्तः॑ । तत् । अ॒ग॒न्न् । पुनः॑ ॥ इ॒द्ध्मः । वेदिः॑ । प॒रि॒ध॒य॒

इति॑ परि – ध॒यः॑ । च॒ । सर्वे᳚ । य॒ज्ञस्य॑ । आयुः॑ । अनु॑ । समिति॑ ।

च॒र॒न्ति॒ ॥ त्रय॑स्त्रिꣳश॒दिति॒ त्रयः॑ – त्रि॒ꣳ॒श॒त् । तन्त॑वः । ये । वि॒त॒त्नि॒र

इति॑ वि – त॒त्नि॒रे । ये । इ॒मम् । य॒ज्ञम् । स्व॒धयेति॑ स्व – धया᳚ ।

दद॑न्ते । तेषा᳚म् । छि॒न्नम् । प्रतीति॑ । ए॒तत् । द॒धा॒मि॒ ।

स्वाहा᳚ । घ॒र्मः । दे॒वान् । अपीति॑ । ए॒तु॒ ॥ **46 (45)**

**(अषा॒ढ–ओ॑षध॑य–उपचि॒न्वन्ति॒–पञ्चचत्वारिꣳशच्च)** *(A10)*

**TS 1.5.11.1**

वै॒श्वा॒न॒रो न॑ ऊ॒त्या ऽऽ प्र या॑तु परा॒वतः॑ । अ॒ग्निरु॒क्थे॒न वाह॑सा ॥

ऋ॒तावा॑नं ॅवैश्वा॒नर॒मृ॒तस्य॒ ज्योति॑ष॒स्पतिं᳚ । अज॑स्रं घ॒र्ममी॑महे ॥

वै॒श्वा॒न॒रस्य॑ द॒ꣳ॒सना᳚भ्यो बृ॒ह॒दरि॑णा॒देकः॑ स्व॒पस्य॑या क॒विः ।

उभा पितरा महयन्नजायताग्नि र्द्यावापृथिवी भूरिरेतसा ॥
पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीरा विवेश ।
वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स – [ ] **47**

**<u>TS 1.5.11.1 (Padam)</u>**

वैश्वानरः । नः । ऊत्या । आ । प्रेति । यातु ।
परावत इति परा – वतः ॥ अग्निः । उक्थेन । वाहसा ॥
ऋतावानमित्यृत–वानम् । वैश्वानरम् । ऋतस्य । ज्योतिषः । पतिम् ॥
अजस्रम् । घर्मम् । ईमहे ॥ वैश्वानरस्य । द७्सनाभ्यः । बृहत् ।
अरिणात् । एकः । स्वपस्ययेति सु – अपस्यया । कविः ॥ उभा ।
पितरा । महयन्न् । अजायत । अग्निः । द्यावापृथिवी इति
द्यावा–पृथिवी । भूरिरेतसेति भूरि – रेतसा ॥ पृष्टः । दिवि । पृष्टः ।
अग्निः । पृथिव्याम् । पृष्टः । विश्वाः । ओषधीः । एति । विवेश ॥
वैश्वानरः । सहसा । पृष्टः । अग्निः । सः । नः ।
दिवा । सः । **47 (50)**

**TS 1.5.11.2**

रिषः पातु नक्तं ॥

जातो यदग्ने भुवना व्यख्यः पशुं न गोपा इर्यः परिज्मा ।

वैश्वानर ब्रह्मणे विन्द गातुं यूयं पात स्वस्तिभिः सदा नः ॥

त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः ।

त्वं देवा(ग्ं) अभिशस्तेरमुञ्चो वैश्वानर जातवेदो महित्वा ॥

अस्माकमग्ने मघवत्सु धारयानामि क्षत्रमजर(ग्ं) सुवीर्यं ।

वयं जयेम शतिन(ग्ं) सहस्रिणं वैश्वानर – [ ] **48**

**TS 1.5.11.2 (Padam)**

रिषः । पातु । नक्तम् ॥ जातः । यत् । अग्ने । भुवना । व्यख्य इति वि – अख्यः । पशुम् । न । गोपा इति गो – पाः । इर्यः । परिज्मेति परि – ज्मा ॥ वैश्वानर । ब्रह्मणे । विन्द । गातुम् । यूयम् । पात । स्वस्तिभिरिति स्वस्ति – भिः । सदा । नः ॥ त्वम् । अग्ने । शोचिषा । शोशुचानः । एति । रोदसी इति । अपृणाः । जायमानः ॥ त्वम् । देवान् । अभिशस्तेरित्यभि – शस्तेः । अमुञ्चः । वैश्वानर । जातवेद इति जात – वेदः । महित्वेति महि – त्वा ॥ अस्माकम् ।

अग्ने । मघवथ्स्विति मघवत् – सु । धारय । अनामि । क्षत्रम् । अजरम् । सुवीर्यमिति सु – वीर्यम् ॥ वयम् । जयेम । शतिनम् । सहस्रिणम् । वैश्वानर । **48 (50)**

**TS 1.5.11.3**

वाजमग्ने तवोतिभिः ॥

वैश्वानरस्य सुमतौ स्याम राजा हिकं भुवनाना–मभिश्रीः ।

इतो जातो विश्वमिदं ँवि चष्टे वैश्वानरो यतते सूर्येण ॥

अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः ।

क्षयन्नस्मभ्यमसुर प्रचेतो राजन्नेना्ँसि शिश्रथः कृतानि ॥

उदुत्तमं ँवरुण पाशमस्मदवाधमं ँवि मद्ध्यम्ँ श्रथाय ।

अथा वयमादित्य – [ ] 49

**TS 1.5.11.3 (Padam)**

वाजम् । अग्ने । तव । ऊतिभिरित्यूति – भिः ॥ वैश्वानरस्य । सुमताविति सु – मतौ । स्याम । राजा । हिकम् । भुवनानाम् । अभिश्रीरित्यभि – श्रीः ॥ इतः । जातः । विश्वम् । इदम् । वीति । चष्टे । वैश्वानरः । यतते । सूर्येण ॥ अवेति । ते । हेडः ।

वरुण । नमोभिरिरिति नमः – भिः । अवेति । यज्ञेभिः । ईमहे ।

हविर्भिरिति हविः – भिः ॥ क्षयन्न् । अस्मभ्यमित्यस्म – भ्यम् ।

असुर । प्रचेत इति प्र – चेतः । राजन्न् । एनाꣳसि । शिश्रथः ।

कृतानि ॥ उदिति । उत्तममित्युत् – तमम् । वरुण । पाशम् ।

अस्मत् । अवेति । अधमम् । वीति । मद्ध्यमम् । श्रथाय ॥ अथ ।

वयम् । आदित्य । **49 (50)**

**TS 1.5.11.4**

व्रते तवानागसो अदितये स्याम ॥

दधिक्राव्.ण्णो अकारिषं जिष्णोरश्वस्य वाजिनः ॥

सुरभि नो मुखा करत् प्र ण आयूꣳषि तारिषत् ॥

आ दधिक्राः शवसा पञ्च कृष्टीः सूर्य इव ज्योतिषाऽपस्ततान ।

सहस्रसाः शतसा वाज्यर्वा पृणक्तु मद्ध्वा समिमा वचाꣳसि ॥

अग्निर्मूर्द्धा भुवः ।

मरुतो यद्धवो दिवः सुम्नायन्तो हवामहे ।

आ तू न – [ ] **50**

**TS 1.5.11.4 (Padam)**

व्रते । तव । अनागसः । अदितये । स्याम ॥ दधिक्राव्.ण्ण इति

दधि – क्राव्.ण्णः । अकारिषम् । जिष्णोः । अश्वस्य । वाजिनः ॥

सुरभि । नः । मुखा । करत् । प्रेति । नः । आयू॑ंषि । तारिषत् ॥

एति । दधिक्रा इति दधि – क्राः । शवसा । पञ्च । कृष्टीः ।

सूर्यः । इव । ज्योतिषा । अपः । ततान ॥ सहस्रसा इति

सहस्र – साः । शतसा इति शत – साः । वाजी । अर्वा । पृणक्तु ।

मद्ध्वा । समिति । इमा । वचा॑ंसि ॥ अग्निः । मूर्द्धा । भुवः ॥

मरुतः । यत् । ह । वः । दिवः । सुम्नायन्त इति सुम्न – यन्तः ।

हवामहे ॥ एति । तु । नः । **50 (50)**

**TS 1.5.11.5**

उप गन्तन ॥

या वः शर्म शशमानाय सन्ति त्रिधातूनि दाशुषे यच्छताधि ।

अस्मभ्यं तानि मरुतो वि यन्त रयिं नो धत्त वृषणः सुवीरं ॥

अदितिर्न उरुष्यत्वदितिः शर्म यच्छतु । अदितिः पात्व॑ंहसः ॥

महीमू षु मातर॑ं सुव्रतानामृतस्य पत्नीमवसे हुवेम ।

तुविक्षत्रा–मजरन्ती–मुरूचीꣳ सुशर्माणमदितिꣳ सुप्रणीतिं ॥

सुत्रामाणं पृथिवीं द्यामनेहसꣳ सुशर्माण( ) मदितिꣳ सुप्रणीतिं ।

दैवीं नावꣳ स्वरित्रा–मनागस-मस्रवन्तीमा रुहेमा स्वस्तये ॥

इमाꣳ सु नावमा ऽरुहꣳ शतारित्राꣳ शतस्फ्यां ।

अच्छिद्रां पारयिष्णुं ॥ **51**

**TS 1.5.11.5 (Padam)**

उपेति । गन्तन ॥ या । वः । शर्म । शशमानाय । सन्ति । त्रिधातूनीति

त्रि – धातूनि । दाशुषे । यच्छत । अधि ॥ अस्मभ्यमित्यस्म–भ्यम् ।

तानि । मरुतः । वीति । यन्त । रयिम् । नः । धत्त । वृषणः ।

सुवीरमिति सु–वीरम् ॥ अदितिः । नः । उरुष्यतु । अदितिः । शर्म ।

यच्छतु ॥ अदितिः । पातु । अꣳहसः ॥ महीम् । उ । स्विति ।

मातरम् । सुव्रतानामिति सु – व्रतानाम् । ऋतस्य । पत्नीम् । अवसे ।

हुवेम ॥ तुविक्षत्रामिति तुवि – क्षत्राम् । अजरन्तीम् । उरूचीम् ।

सुशर्माणमिति सु – शर्माणम् । अदितिम् ।

सुप्रणीतिमिति सु – प्रणीतिम् ॥ सुत्रामाणमिति सु – त्रामाणम् ।

पृथिवीम् । द्याम् । अनेहसम् । सुशर्माणमिति सु – शर्माणम् ( ) ।

अदितिम् । सुप्रणीतिमिति सु – प्रणीतिम् ॥ दैवीम् । नावम् ।

स्वरित्रामिति सु – अरित्राम् । अनागसम् । अस्रवन्तीम् । एति ।

रुहेम । स्वस्तये ॥ इमाम् । स्विति । नावम् । एति । अरुहम् ।

शतारित्रामिति शत – अरित्राम् । शतस्फ्यामिति शत – स्फ्याम् ॥

अच्छिद्राम् । पारयिष्णुम् ॥ **51 (69)**

**(दिवा स–सहस्रिणं वैश्वानरा–दित्य– तू नो–ऽनेहसं सुशर्माण–**

**मेकान्नविंशतिश्च )***(A11)*

======================

**Prasna Korvai with starting Padams of 1 to 11 Anuvaakams :-**

(देवासुराः–परा–भूमि–र्भूमि–रुपप्रयन्तः–सं पश्या–म्ययज्ञः–सं पश्या–म्यग्निहोत्रं–मम नाम–वैश्वानर–एकादश) ।

**Korvai with starting Padams of 1, 11, 21 Series of Panchaatis :-**

(देवासुराः–क्रुद्धः–सं पश्यामि–सं पश्यामि–नक्त–मुपगन्त–नैकपञ्चाशत्)

**First and Last Padam of Fifth Prasnam :-**

(देवासुराः–पारयिष्णुं)

॥ हरिः ओं ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहिता पद पाठे प्रथमकाण्डे पञ्चमः प्रश्नः समाप्तः ॥

------------------------------------

## Summary breakup of Padam - in Kaandam 1, Prasnam 5

| Particulars | | Example ( in Pada PaaTam) | No. of Padams as per Pada PaaTam |
|---|---|---|---|
| सामान्य पदानि | Ord | इषे । त्वा । ऊर्जे । | 2129 |
| उपसर्ग पदानि | PRE | एति = (आ+इति) । उपेति = (उप+इति) । प्रेति = (प्र+इति) । | 191 |
| वेष्टन पदानि | PS | उपायवः = उपायव इत्युप - आयवः ।<br>बाहुभ्याम् = बाहुभ्यामिति बाहु - भ्याम्) । | 369 |
| प्रग्रह पदानि | PG | ते = (ते इति) । त्वे = (त्वे इति) । चक्षुषी = (चक्षुषी इति) ।<br>विष्णो = विष्णो इति॒ । | 18 |
| प्रग्रह वेष्टन पदानि | PGS | अधिषवणे = अधिषवणे इत्यधि - सवने ।<br>इन्द्राग्नी = इन्द्राग्नी इतीन्द्र - अग्नी | 10 |
| | | Total Padams | 2717 |

## Details of Panchati and Padam for Kandam 1, Prasanam 5 – (TS 1.5)

| | Panchati | Padams |
|---|---|---|
| Anuvakam 1 | 4 | 225 |
| Anuvakam 2 | 5 | 236 |
| Anuvakam 3 | 3 | 163 |
| Anuvakam 4 | 4 | 225 |
| Anuvakam 5 | 4 | 217 |
| Anuvakam 6 | 4 | 229 |
| Anuvakam 7 | 6 | 316 |
| Anuvakam 8 | 5 | 279 |
| Anuvakam 9 | 7 | 363 |
| Anuvakam 10 | 4 | 195 |
| Anuvakam 11 | 5 | 269 |
| Total → | 51 | 2717 |